शुक्लो रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम् ।
चामरो राजकेशस्य न सामान्यस्य भूपतेः ॥
न भयमानतो न्यूनं चामरं गुणमावहेत् ॥”
अथ चामरपरीक्षा ।
स्थलजं जलजञ्चेति चामरं द्विविधं विदुः ।
मेरौ हिमालये विन्ध्ये कैलासे मलये तथा ॥
उदयेऽस्तगिरौ चैव गन्धमादनपर्व्वते ।
एवमेतेषु शैलेषु याश्चमर्यो भवन्ति हि ॥
तासां वालस्य जायेत चामरेत्यभिधा भुवि ॥
आपीताः कनकाद्रिजा हिमगिरेः शुभ्रायता विन्ध्यजाः
कैलासादसिताः सिता मलयजाः शुक्लास्तथा पिङ्गलाः ।
आरक्ता उदयोद्भवाश्चमरजा आनीलशुक्लत्विषः
कृष्णाः केचन गन्धमादनभवाः पाण्डुत्विषश्चामराः ॥
अन्येषु प्रायशः कृष्णाश्चामराः सम्भवन्ति हि ।
ब्रह्मक्षत्रियविट्शूद्रजातयस्ताश्चतुर्व्विधाः ॥
चमर्य्यः पर्व्वतोद्भूता यथापूर्व्वं गुणावहाः ।
दीर्घवालाः सुलघवः स्निग्धाङ्गाश्चापि कोमलाः ।
विरलास्तनुपर्व्वाणश्चमर्य्यो ब्रह्मजातयः ।
विना संस्कारमप्यासां चामरं विमलं भवेत् ॥
दीर्घवालाः सुगुरवः कर्कशाङ्गा भृशं घनाः ।
विज्ञेयाः स्थूलपर्व्वाणश्चमर्य्यो वैश्यजातयः ॥
संस्कारे चाप्यसंस्कारे न स्वभावं त्यजेदिदम् ।
खर्व्ववालाः सुलघवः कोमलाङ्गा भृशं घनाः ॥
चमर्य्यस्तनुपर्व्वाणो विज्ञेयाः शूद्रजातयः ।
संस्कारेणापि मलिनमासां चामरमिष्यते ॥*॥
दीर्घता लघुता चैव स्वच्छता घनता तथा ।
गुणाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
खर्व्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता ।
दोषाश्चत्वार इत्येते चामराणां प्रकीर्त्तिताः ॥
दीर्घे दीर्घायुराप्नोति लघौ भीतिविनाशनम् ।
स्वच्छे स्याद्धनकीर्त्तिश्च घने स्युः स्थिरसम्पदः ॥
खर्व्वे खर्व्वायुरुद्दिष्टं गुरुर्गुरुभयप्रदः ।
वैवर्ण्ये रोगशोकौ च मलिनं मृत्युमादिशेत् ॥”
इति स्थलजम् ॥ * ॥
अथ जलजम् ।
“लवणेक्षुसुरासर्पिर्दधितोयपयोऽब्धिषु ।
यथोत्तरं गुणवहाश्चमर्य्यः सप्त सप्तसु ॥
पुच्छानि तासां कृत्तानि जन्तुभिर्म्मकरादिभिः ।
कदाचिदुपलभ्येत तत्तीरे पुण्यशालिभिः ॥
लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु ।
वह्नौ क्षिप्तश्च वालश्चेत् किञ्चिच्चटचटायते ॥
इक्षुसिन्धूद्भवं ताम्रं चामरं विमलं लघु ।
मक्षिका मशकाश्चैव तस्मिन् व्रजति चामरे ॥
सुराब्धिजातं कलुषं कर्व्वुरं गुरुकर्कशम् ।
तद्गन्धेनैव माद्यन्ति अपि दृप्ता मतङ्गजाः ॥
सर्पिःसिन्धुभवं स्निग्धं श्वेतापीतं घनं लघु ।
वायुरोगाः प्रशाम्यन्ति तस्य वीजनवायुना ॥
जलसिन्धूद्भवं पाण्डु दीर्घं लघु घनं महत् ।
अस्य वातेन नश्येत्तु तृष्णा मूर्च्छा मदो भ्रमः ॥
नारिष्टं नेतयस्तस्य यस्येदं चामरं गृहे ।
क्षीरोदसम्भवं श्वेतं दीर्घं लघु घनं महत् ॥
अस्य चामरराजस्य विज्ञेयो गुणविस्तरः ।
नाल्पेन तपसा लभ्यो देवानामपि जायते ॥
ह्रियतेऽभ्यन्तरे सिन्धोर्नागैः सम्पत्तिलोलुपैः ।
एषां पूर्व्ववदन्येषां जातिदोषगुणादिकम् ॥ * ॥
स्थलजे जलजे चैव भाव्यमेतद्विशेषणम् ।
स्थलजं सुखदग्धं हि दाहे मिषमिषायते ॥
जलजं वह्निदग्धं महान्तं धूममुद्गिरेत् ।
चामराणां समुद्दिष्टमित्येवं लक्षणद्वयम् ॥
एवं विज्ञाय यो धत्ते स राजा सुखमश्नुते ॥*॥
जलजं चामरं राजा यो धत्ते जाङ्गलेश्वरः ।
तस्याचिरात् कुलं वीर्य्यं लक्ष्मीरायुश्च नश्यति ॥
अनूपाधीश्वरो राजा यो वहेत् स्थलजं तथा ।
तस्यैतानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम् ॥
नालं वर्णद्वये तेषां विधेयं शिल्पिना क्रमात् ।
संस्कारो वालुकायन्त्रे मसूरसलिलादिभिः ।
तद्गुणासलिलक्काथात् कृत्रिमत्वं विपद्यते ॥”
इत्युपकरणयुक्तौ चामरोद्देशः । इति भोजराजकृतयुक्तिकल्पतरुः ॥

चामरपुष्पः, पुं, (चामरवत् पुष्पमस्य ।) गुवाकः । काशः । आम्रः । केतकः । इति मेदिनी । पे ३१ ॥

चामरपुष्पकः, पुं, (चामरपुष्प + स्वार्थे कन् । चामरमिव पुष्पमस्य इति कप् वा ।) काशः । इति जटाधरः ॥ चामरपुष्पार्थोऽप्यत्र ॥

चामरा, स्त्री, (चामर + अर्शआदित्वात् टाप् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, स्त्री, (चामर + संज्ञायां ङीष् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, [न्] पुं स्त्री, (चामर इव केशरोऽस्त्यस्य । इति इनिः ।) घोटकः । इति त्रिकाण्डशेषः ॥

चामीकरं, क्ली, (चमीकरः रत्नाकरविशेषः तत्र भवमित्यण् ।) स्वर्णम् । (यथा, शिवपुराणे वायुसंहितायाम् । २ । १३ ।
“ददृशुर्मुनयो देवा देवर्षिगणसेवितम् ।
शुद्धचामीकरप्रख्यं सर्व्वाभरणभूषितम् ॥”)
धुस्तूरः । इत्यमरः । २ । ६ । ६५ ॥

चामुण्डा, स्त्री, (महासंग्रामे चण्डमुण्डाख्यौ द्वौ शुम्भनिशुम्भसेनाध्यक्षौ अनया शक्त्या निहतौ अतः परितुष्टया भगवत्या कौशिक्या अस्याश्चामुण्डेति संज्ञा रचिता । एतत् सर्व्वन्तु वक्ष्यमाणासु प्रवृत्तिषु द्रष्टव्यम् ।) दुर्गा । इति जटाधरः ॥ मातृकाभेदः । इति शब्दरत्नावली ॥ तत्पर्य्यायः । चर्च्चिका २ चर्म्ममुण्डा ३ मार्ज्जारकर्णिका ४ कर्णमोटी ५ महागन्धा ६ भैरवी ७ कापालिनी ८ । इति हेमचन्द्रः ॥
अस्या ध्यानं यथा,—
“काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥”
अस्याश्चामुण्डेति नामकारणं यथा,—
“यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि ! भविष्यसि ॥”
इति चण्डी ॥
अस्यास्तन्त्रादिकं यथा,—
“देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव ! ॥
समाप्तिसहितो दन्त्यः प्रान्तस्तस्मात् पुरःसरः ।
षष्ठस्वराग्निबिन्द्विन्दुसहितो मादिरेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि वत्सैकाग्रमनाः शृणु ॥
नीलोत्पलदलश्यामा चतुर्व्वाहुसमन्विता ।
खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म कपालञ्च ऊर्द्ध्वाधोभावतः पुनः ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणानना ।
एषा ताराह्वया देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनी चाष्टौ पूजयेच्चिन्तयेदपि ।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विधायिका ॥
कराला शूलिनी चेति अष्टौ ताः परिकीर्त्तिताः ।
एषातिकामदा देवी जाड्यहानिकरी सदा ॥
एतस्याः सदृशी काचित् कामदा न हि विद्यते ॥”
इति कालिकापुराणे ६० अध्यायः ॥

चाम्पिला, स्त्री, (चपि + भावे घञ् । ततष्टाप् । चम्पेवेति चाम्पा । ततोऽस्त्यर्थे इलच् टाप् च ।) नदी । इति त्रिकाण्डशेषः ॥

चाम्पेयः, पुं, (चम्पायां नद्यां भव इति ढक् ।) चम्पकः । इत्यमरः । २ । ४ । ६३ ॥ (यथास्य पर्य्यायाः ।
“चाम्पेयश्चम्पकः प्रोक्तो हेमपुष्पश्च स स्मृतः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नागकेशरः । (यथा,—
“नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
राजविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ५४० ।
“चाम्पेयो जासटोवज्रधरौ वल्लापुराधिपः ॥”
विश्वामित्रपुत्त्राणामन्यतमः । यथा, महाभारते । १३ । ४ । ५७ ।
“आराणिर्नाचिकश्चैव चाम्पेयोज्जयनौ तथा ॥”
क्ली, सुवर्णम् । यथा काशीखण्डे । २४ । ३६ ।
“मणिमाणिक्य-चाम्पेयदुकूलैभाश्वगोधनम् ॥”)

चाम्पेयकं, क्ली, (चाम्पेय इव कायतीति । कै + कः । स्वार्थे कन् वा ।) किञ्जल्कः । इति राजनिर्घण्टः ॥

चाम्यं, क्ली, (चम्यते भक्ष्यते इति । चम + कर्म्मणि ण्यत् ।) भक्ष्यम् । इति व्याकरणम् ॥

चाय, ऋ ञ निशामे । अर्च्चे । इति कविकल्पद्रुमः ॥ (भ्वा-उभं-सकं-सेट् ।) ऋ, अचचायत् । ञ, चायति चायते । निशाम इति चाक्षुषज्ञानम् । तं पर्व्वतीयाः प्रमदाश्चचायिरे । इति माघः । इति दुर्गादासः ॥